# संस्कृतसाहित्येषु श्रीअरविन्दः तस्य अवदानम् च।

भारतमातुः श्रेष्ठः साधकसन्तानः आसीत् ऋषिः अरविन्दः। यः एकतः देशप्रेमिकः आसीत्, अपरतश्च भाषाविशारदः कश्चित् महान् पण्डितश्च आसीत्। कविः दार्शनिकश्च अरविन्दः १८७२ खीष्टाब्दस्य अगस्तमासस्य पञ्चमे दिवसे कलिकातायाम् अजायत। तस्य जनकः आसीत् कृष्णधन-घोषः माता च आसीत् श्यामलतादेवी। यदा अरविन्दः पञ्चमवर्षं प्राप्तवान् तदा शिक्षालाभार्थं सः दार्जिलिम् इति नगरीम् आगतवान्, ल्यरेटो कनभेन्ट इत्याख्ये विद्यालये च अध्ययनं कृतवान्। अरविन्दः अतीव कृतविद्यः आसीत्। तथापि स व्रिटिशशासकानाम् अधीने कार्यभारम् अङ्गीकर्तुम् नैच्छत्। तस्मात् शिक्षासम्पादनात् अनन्तरम् सः पुनः स्वदेशं प्रत्यागम्य वरोदाराजस्य अधीने कस्मिंश्चित् महाविद्यालये अध्यापकपदेन अलंकृतः आसीत्। अस्मिन् समये तस्य स्वदेशानुरागस्य जागरणम् अभवत्। तत्र मुख्यतया साहाय्यम् कृतवान् महाराष्ट्रस्य विप्लवी ठाकुरमहाशयः। १९०२ खीष्टाब्दे वङ्गदेशे विप्लवीसभायाः गठनार्थं आत्मनः अनुजः वारीन्द्रकुमारघोषः महोदयः तेन प्रेरितः। तदा वरोदा-महाविद्यालयस्य अध्यक्षपदं परित्यज्य प्रत्यक्षतः स्वाधीनतासंग्रामेषु आत्मनियोगं कृतवान् श्रीअरविन्दः घोषः। वन्देमातरम् इति पत्रिकायाः सम्पादकोऽपि आसीत् अरविन्दः। अथ राष्ट्रद्रोहितायाः अपराधात् व्रिटिशसरवकारः तं घोषमहोदयं कारागारे निक्षिप्तवान्। वन्दीदशायाः अवसाने सति अरविन्दः आध्यात्मिकजीवनस्य प्रारब्धम् कृतवान्। अस्मिन् एव समय् तेन आङ्गलभाषया, वङ्गभाषया तथा संस्कृतभाषया च वहवः ग्रन्थाः विरचिताः।

श्रीअरविन्दः आङ्गलभाषया प्रथमतः ग्रन्थं विरचितवान् इति वक्तुं शक्यते। तेन आङ्गलभाषायाम् अन्येऽपि केचन ग्रन्थाः विरचिताः। ते हि – The life Divine, Essays on Gita, Savitri, Mother India, The hero and the Nymph, Urvasie, Song to Myrtilla and other poems, The age of Kalidasa, A system of National Education, The Renaissance of India, Speeches of Aurovindo इत्यादयः। वङ्गभाषायाम् काराकाहिनी इति धर्म ओ जातीयता इति ग्रन्थद्वयमपि तेन विरचितम्। भवानीभारती इति हि संस्कृतभाषायाम् विरचितः कश्चित् महान् ग्रन्थः। अरविन्दशब्दस्य अर्थो भवति श्वेतपद्मम्। अर्थात् श्वेतकमलमिव स आसीत् शुभ्रः तथा चित्तापहारकः। तस्य संग्रामः तथा वाणी अद्यापि अस्माकं जीवनस्य मार्गप्रदर्शकरूपेण प्रतिभाति। अयं महापुरुषः १९५०ख्रीष्टाब्दस्य नभेम्बरमासस्य पञ्चमे दिवसे तेन प्रतिष्ठिते पण्डिचेरी आश्रमे चिराय नेत्रनिमीलनं कृतवान्।

## भवानीभारती

भवानीभारती श्रीअरविन्देन विरचितः कश्चित् महान् ग्रन्थः। विश्वकवेः रवीन्द्रनाथस्य जातीयसङ्गीतम् यथा अस्मान् प्रेरयति, साहित्यसम्राजः वङ्किमचन्द्रस्य वन्देमातरम् यथा अस्माकं मनसि रोमाञ्चं जनयति तद्वत् श्रीअरविन्दस्य भवानीभारती इति काव्यमपि अस्माकं चित्तम् आकर्षयति। १९८३ ख्रीष्टाव्दे पण्डिचेरि-प्रदेसे विराजमानात् आश्रमात् एव काव्यमिदं प्रकाशितम्। अस्मिन् काव्यग्रन्थे नवनवतिश्लोकाः सन्ति, यैः श्लोकैः कविना देशमातृकायाः स्तुतिः विहिता। इमे सर्वेऽपि श्लोकाः छन्दसा विरचिताः।

अस्मिन् काव्ये श्रीअरविन्दः देशमातृकाम् भवानीरूपेण कल्पयति। कविः यदा वरोदाप्रदेशस्य कारागारे आसीत् तदा कदाचित् तस्य स्वप्नदर्शनेन स भारतमाताम् भवाणीरूपेण दृष्टवान्। कविः अपश्यत् यत्, क्षुधया तृष्णया कातुरा, दरिद्रा, क्रुरा, करालद्रंष्ट्रा, भयङ्करी सा भारतजननी गलदेशे अस्थिमाला परिहिता, कटिदेशे च नरमुण्डमालया विभूषिता सती उच्चैः नादं करोति। तस्याः रुद्रमूर्तिः कविना एवं वर्णिता –

"सौम्यं वपुस्ते हिमवर्णमायां सौम्यं भवान्यावदनं ह्युदारम्।

शुक्लाम्बरा यौवनशुभ्रकान्तिं स्नेहाद्रनेत्रां वलिनीं नमामि॥

नरस्थिमालां नृकपालकाञ्चीं वृकोदराक्षीं क्षुधितां दरिद्रां

पृष्ठे व्रणाङ्कमसुरप्रतेदैः सिंहीं नदन्तीमिव हन्तुकामान्॥" इति।

स्वप्नेन दृष्टमात्रे शय्यात् उत्थाय मातृवन्दनया अस्याः आगमनकारणम् कविः अपृच्छत्। तदा भारतमाताऽपि कविं पुत्र इति सम्बोधनं कृत्वा भारतवर्षस्य पुरातम् ऐतिह्यम् स्मारितवती। तदुक्तं कविना –

"माताऽस्मि भोः पुत्रक भारतानां सनातनानां त्रिदशप्रियाणाम्।

शक्तो न यान् पुत्र विधिर्विपक्षः कलोऽपि नो नाशयितुं यमो वा॥" इति।

आक्षेपज्ञानपूर्वकम् सर्वान् भारतवासिनः आङ्गलानां च विरोधं कृत्वा विद्रोहार्थम् तस्य समुद्घोषः –

“भो भो अवन्त्या मगधाश्च वङ्गा अङ्गा कलिङ्गाः कुरुसिन्धवश्च।

भो दाक्षिणात्याः शृणु तान्त्रतोला वसन्ति ये पञ्चनदेषु शूराः॥

उत्तिष्ठ भो जागृहि सर्जयाग्रीन् साक्षादधि तेजोऽपि परस्य शौरेः।

वक्षः स्थितेनैव सनातनेन शत्रून् हुताशेन दहन् नटस्व॥” इति।

वहिरागत्य कविः भारतमात्रा सह युद्धरतं राक्षसराजम् अपश्यत्। सूर्ये उदिते दानवस्य विनाशः अभवत्। तदा सर्वेषाम् भारतवासिनां दुःखविदलनं भविष्यति। अथ सर्वे मातुः स्तुतिं कृतवन्तः। अत्र एव काव्यस्य समाप्तिः परिलक्ष्यते।

यद्यपि काव्यमिदम् कायेन अत्यन्तम् लघु, तथापि मातृभूमेः माहात्म्यवर्णनेन काव्यमिदम् अत्यन्तम् गुरुत्वम् आवहति। सर्वोपरि कवेः लेखनीशैल्याः नैपुण्ये न भवानीभारती इति काव्यम् सहृदयहृदयानां चेतश्चमत्कारं जनयति इति अलम् विस्तरेण इति शम्॥

**प्रश्नः – श्रीअरविन्दम् भवानीभावतीं वा आश्रित्य संस्कृतभाषया देवनागरलिप्या च समासेन टिप्पिनीं लिखत।**